## त्रयोदशः पाठः

# पारस्परिकीयम्

**संस्कृतभाषायां कथासाहित्यस्य विपुलभाण्डारम्। तस्मिन् पण्डितविष्णुशर्मणा विरचितस्य पञ्चतन्त्रस्य विशिष्टस्थानमस्ति। ग्रन्थेऽस्मिन्, बालानां कृते सरला सरसा सुबोधा अनेकाः नीतिकथाः उपलभ्यन्ते। अस्मिन् ग्रन्थे मित्रभेद-मित्रसम्प्राप्ति-काकोलूकीय-लब्धप्रणाशा-अपरीक्षितकारकानि-चेति पञ्चतन्त्राणि सन्ति। एतेषु पञ्चतन्त्रेषु पशुपक्षिमाध्यमेन नीतिसिद्धान्ताः प्रतिपादिताः सन्ति।**

**कथेयं काकोलूकीय तन्त्रात् उद्धृता। परस्परमर्मभेदः न कर्त्तव्यः इत्यस्याः कथायाः सन्देशः।**

अस्ति कस्मिंश्चिन्नगरे देवशक्तिर्नाम राजा। तस्य च पुत्रो जठरवल्मीकाश्रयेणरोगेण प्रतिदिनं प्रत्यङ्गं क्षीयते। अनेकोपचारैः सद्वैद्यैः सत्शास्त्रोपदिष्टौषधयुक्त्याऽपि चिकित्स्यमानो न स्वास्थ्यमेति। अथासौ राजपुत्रो निर्वेदाद् देशान्तरं गतः। कस्मिंश्चिन्ननगरे भिक्षाटनं कृत्वा महति देवालये कालं यापयति। अथ तत्र नगरे बलिर्नाम राजाऽऽस्ते। तस्य च द्वे दुहितरौ यौनस्थे तिष्ठतः। ते च प्रतिदिवसमादित्योदये पितुः पादान्तिकमागत्य नमस्कारं चक्रतुः। तत्र चैकाऽब्रवीत् – 'विजयस्व महाराज! यस्य प्रसादात्सर्वं सुखं लभ्यते।' द्वितीया तु– 'विहितं भुङ्क्ष्व महाराज!' इति ब्रवीति। तच्छ्रुत्वा प्रकुपितो राजाऽब्रवीत्–'भो मन्त्रिणः! एनां दुष्टभाषिणीं कुमारिकां कस्यचिद्वैदेशिकस्य प्रयच्छत, तेन निजविहितमियमेव भुङ्क्ते। अथ 'तथा' इति प्रतिपद्याल्पपरिवारा सा कुमारिका मन्त्रिभिस्तस्य देवकुलाश्रितराजपुत्रस्य प्रतिपादिता। साऽपि प्रहृष्टमनसा तं पतिं देववत्प्रतिपद्यादाय चान्यविषयं गता। ततः कस्मिंश्चिद् दूरतरनगरप्रदेशे तडागतटे राजपुत्रमावासरक्षायै निरूप्य स्वयं च घृततैललवणतण्डुलादिक्रयनिमित्तं सपरिवारा गता। कृत्वा च क्रयविक्रयं यावदागच्छति तावत्स राजपुत्रो वल्मीकोपरि कृतमूर्धा प्रसुप्तः। तस्य च मुखाद्भुजगः फणं निष्कास्य वायुमश्नाति। तत्रैव च वल्मीकेऽपरः सर्पो निष्क्रम्य तथैवासीत्। अथ तयोः परस्परदर्शनेन क्रोधसंरक्तलोचनयोः मध्यात् वल्मीकस्थेन सर्पेणोक्तम् भो भोः! दुरात्मन् कथं सुन्दरसर्वाङ्गं राजपुत्रमित्थं कदर्थयसि? मुखस्थोऽहिरब्रवीत्–

'भो भोः! त्वयाऽपि दुरात्मनाऽस्य वल्मीकस्य मध्ये कथमिदं दूषितं हाटकपूर्णं कलशयुगलम्' इत्येवं परस्परस्य मर्माणि उद्घाटितवन्तौ। पुनर्वल्मीकस्थोऽहिरब्रवीत्–'भोः! दुरात्मन! भेषजमिदं ते किं कोऽपि न जानाति यज्जीर्णोत्कालितका-ञ्जिकाराजिकापानेन भवान्विनाशमुपयाति।' अथोदरस्थोऽहिरब्रवीत्–'तवाऽप्येतद् भेषजं किं कश्चिदपि न वेत्ति यदुष्णतैलेन महोष्णोदकेन वा तव विनाशः स्यात् इति। एवं च सा राजकन्या विटपान्तरिता तयोः परस्परालापान्मर्ममयानाकर्ण्य तथैवानुष्ठितवती। विधायाव्यङ्गं नीरोगं भर्त्तारं निधिं च परमासाद्य स्वदेशाभिमुखं प्रायात्। पितृमातृस्वजनैः प्रतिपूजिता विहितोपभोगं प्राप्य सुखेनावस्थिता। अतोऽहं ब्रवीमि–

**परस्परस्य मर्माणि ये न रक्षन्ति जन्तवः।**
**त एव निधनं यान्ति वल्मीकोदरसर्पवत्॥**

## शब्दार्थः

| | | |
|---|---|---|
| वल्मीकम् | – | वल्मीकूटम् / बांबी, वमई |
| जठरम् | – | उदरम् / पेट |
| क्षीयते | – | ह्रासं जायते / क्षीण होना |
| निर्वेदात् | – | दुःखात् / दुःखी होकर |
| यापयति | – | व्यतीतं करोति / व्यतीत करता है। |
| पादान्तिकम् | – | चरणसमीपम् / अतिनिकट |
| प्रसादात् | – | अनुकम्पया / कृपा से |
| विहितम् | – | कृतम् / किए हुए को |
| अश्नाति | – | सेवनं करोति / सेवन करता है। |
| कदर्थयति | – | क्लेशयति / पीडित करता है। |
| हाटकपूर्णम् | – | सुवर्णपूर्णम् / सुवर्ण से परिपूर्ण |
| उद्घाटितवन्तौ | – | प्रकाशितौ / प्रकाशित कर दिए |
| भेषजम् | – | औषधम् / दवाई (औषधि) को |
| राजिका | – | राई |
| विनाशम् उपयाति | – | विनाशम् उपगच्छति / विनष्ट होता है |
| अव्यङ्गम् | – | पूर्णाङ्गम् / सभी अङ्गों को |
| आसाद्य | – | प्राप्तं कृत्वा / प्राप्त करके |

## अभ्यासः

1. **एकपदेन उत्तरत –**

   (क) राजपुत्रस्य जठरे कः वसति स्म?

   (ख) कन्या राजपुत्रं कुत्र नियुक्तम् अकरोत्?

   (ग) देशान्तरे राजपुत्रः कुत्र अवसत्?

   (घ) मन्त्रिभिः द्वितीया कुमारिका कस्मै प्रदत्ता?

2. **एकवाक्येन उत्तरत –**

   (क) बलेः एका कन्या किम् अब्रवीत्?

   (ख) जठरस्थोऽहिः कथं वायुम् अश्नाति?

   (ग) राजपुत्रः कस्योपरि कृतमूर्धा प्रसुप्तः?

   (घ) कन्या आवासरक्षायै कं निरूपितवती?

   (ङ) कन्या कानि-कानि वस्तूनि क्रेतुं गतवती?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत-**

(क) कस्मात् कारणात् राजपुत्रः देशान्तरं गतः?

(ख) बलिः प्रकुपितो भूत्वा किम् अकथयत्?

(ग) द्वितीया कन्या प्रहृष्टमनाः भूत्वा किम् अकरोत्?

(घ) ये परस्परभेदं प्रकटयन्ति तेषां किं भवति?

(ङ) द्वयोः सर्पयोः परस्परं मर्मभेदनस्वरूपं वर्णयत?

4. **समपदमेलनं कुरुत-**

| | (अ) | (ब) |
|---|---|---|
| (क) | राजा | अहिः |
| (ख) | कालम् | ह्रासम् |
| (ग) | क्षीयते | विशालम् |
| (घ) | भुजगः | भूपतिः |
| (ङ) | महति | समयः |

5. **नामनिर्देशपूर्वकं सन्धिविच्छेदं कुरुत-**

(क) अनेकोपचारैः

(ख) कस्मिंश्चिन्नगरे

(ग) चैका

(घ) तच्छ्रुत्वा

(ङ) सापि

(च) इत्येवम्

(छ) यदुष्णतैलेन

6. **कोष्ठकस्य शब्दानाधृत्य वाक्यानि रचयत-**

(आश्रयेण, प्रतिदिवसम्, गतः, देशान्तरम्, श्रुत्वा, प्रहृष्टमनसा, भोः!, हाटकपूर्णम्, भेषजम्, उदकेन, नीरोगम्, स्वजनैः)

7. **निर्देशानुसारम् अधोलिखितशब्दानां रूपाणि लिखत-**

(क) युष्मद् - तृतीया विभक्तिः

(ख) पितृ - पञ्चमी विभक्तिः

(ग) किम् (स्त्रीलिङ्ग) - सप्तमी विभक्तिः

(घ) तत् (पुल्लिङ्ग) - द्वितीया विभक्तिः

| | | | |
|---|---|---|---|
| (ङ) | राजन् | – | षष्ठी विभक्तिः |
| (च) | भानु | – | पञ्चमी विभक्तिः |
| (छ) | मुख | – | तृतीया विभक्तिः |

8. कथा सारं स्वशब्देषु लिखत?

9. विशेषणं विशेष्येण योजयत –

| विशेषणम् | | विशेष्यम् |
|---|---|---|
| सुन्दरसर्वाङ्गम् | → | कलशम् |
| महति | | कन्या |
| उष्णतैलेन मृतः | | सर्पः |
| पितृमातृस्वजनैःपूजिता | | राजपुत्रम् |
| क्रोधसंरक्तलोचनाः | | देवालयम् |
| नीरोगम् | | |

10. धातुरूपाणि निर्देशपूर्वकं लिखत–

| | | | | |
|---|---|---|---|---|
| (क) | गम् | – | लङ्लकारः | – मध्यमपुरुषः |
| (ख) | तिष्ठ् | – | लोट्लकारः | – उत्तमपुरुषः |
| (ग) | लभ् | – | लट्लकारः | – प्रथमपुरुषः |
| (घ) | भू | – | विधिलिङ् लकारः | – उत्तमपुरुषः |
| (ङ) | पा | – | लृट्लकारः | – प्रथमपुरुषः |

**योग्यताविस्तारः –**

- कथायाः शिक्षां ज्ञात्वा आचरणीयः।
- पञ्चतन्त्रात् अन्याः कथाः सङ्ग्रहणीयाः।